# Mahadeva Stuti Lobhasurakrita

# લોભાસુરકૃતા મહાદેવસ્તુતિઃ

## Document Information

Text title : Mahadeva Stuti Lobhasurakrita

File name : mahAdevastutiHlobhAsurakRRitA.itx

Category : shiva, mudgalapurANa, stuti

Location : doc_shiva

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM chaturthaH khaNDaH | adhyAyaH 36 | 4.36. 40-49||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# લોભાસુરકૃતા મહાદેવસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
લોભાસુર ઉવાચ ।
નમસ્તે વિશ્વનાથાય સર્વાન્તર્યામિણે નમઃ ।
શઙ્કરાય શિવાયૈવ હ્યનન્તગુણરાશયે ॥ ૪૦॥
ત્રિનેત્રાય મહાદેવ શક્તિયુક્તાય શમ્ભવે ।
નિર્ગુણાય ગુણાનાં તે ચાલકાય નમો નમઃ ॥ ૪૧॥
અમેયશક્તયે તુભ્યં ગિરીશાય વૃષધ્વજ ।
સ્રષ્ટ્રે પાત્રે ચ સંહર્ત્રે ત્રિધારૂપાય વૈ નમઃ ॥ ૪૨॥
અકર્તુમન્યથા કર્તું કર્તું શક્તાય તે નમઃ ।
સદા મોહવિહીનાય મૃડાય સતતં નમઃ ॥ ૪૩॥
સ્વાધીનાય પરેશાય સહજે ખેલકારિણે ।
શૂલહસ્તાય દેવાનાં પતયે તે નમો નમઃ ॥ ૪૪॥
કૈલાસવાસિને તુભ્યં ભસ્મલેપકરાય વૈ ।
દિગમ્બરાય સર્વેભ્યઃ સર્વદાય નમો નમઃ ॥ ૪૫॥
એવં સ્તુત્વા મહેશાનં તૂષ્ણીં ભાવેન સંસ્થિતઃ ।
લોભાસુરઃ પ્રસન્નાત્મા સાશ્રુકઃ સ કૃતાઞ્જલિઃ ॥ ૪૬॥
તમુવાચ મહાદેવો વરં વૃણુ હૃદીપ્સિતમ્ ।
દાસ્યામિ તપસા સ્તોત્રેણ તુષ્ટો દાનવોત્તમ ॥ ૪૭॥
(ફલશ્રુતિઃ)
ત્વયા કૃતમિદં સ્તોત્રં મમ પ્રીતિવિવર્ધનમ્ ।
ભવિષ્યતિ ન સન્દેહો ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૪૮॥
યઃ પઠિષ્યતિ દૈત્યેન્દ્ર શ્રાવયિષ્યતિ વા નરઃ ।
શ્રોષ્યતે સ લભેત્ સદ્યો વાઞ્છિતં મત્પ્રિયઃ સદા ॥ ૪૯॥

ઇતિ લોભાસુરકૃતા મહાદેવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં ચતુર્થઃ ખણ્ડઃ । અધ્યાયઃ ૩૬ । ૪.૩૬। ૪૦-૪૯॥

- .. mudgalapurANaM chaturthaH khaNDaH . adhyAyaH 36 . 4.36. 40-49..

Proofread by Yash Khasbage, Preeti Bhandare

*Mahadeva Stuti Lobhasurakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*